मोहनेस्तंभनेशश्वद्वशीकरणमेवच उच्चाटनेज्वालनेचशोषणांदीपनेंतथा २७ उन्मादनेतापनेचनिधिदर्शनमेवच यद्यद्वांछति
चित्तेनतत्तत्प्राप्नोतिमानवः २८ ब्रह्मणोब्रह्मवर्चस्वीराजन्योजगतीपतिः लिप्यतेनसपापेनपद्मपत्रमिवांभसा २९ शनवारेपठे
न्नित्यंवर्षावधिमतःपरं पटलंपद्धतिंकृत्वास्तवकंकवचंतथा ३० सप्तद्वीपमहीराज्यंप्राप्नुयान्नात्रसंशयः निःकारणंपठेद्यस्तु
यमुनाभक्तिसंयुतः ३१ त्रिवर्गमेत्यसत्कृतीजीवन्मुक्तोनसंशयः ३२ निकुंजलीलाललितंमनोहरंकलिंदजाकूललताकदंब
कं वृंदावनोन्मत्तमलिंदशोभितंव्रजेत्सगोलोकमिदंपठेद्यः ३३ ॥ इतिश्रीमद्गर्गसंहितायांमाधुर्यखंडेनारदब
हुलाश्वसंवादेश्रीयमुनासहस्रनामकथनंनामैकोनविंशोध्यायः १९ ॥ नारदउवाच इतिकृष्णस्तवंकृत्वामांधातानृपसत्तमः
अयोध्यांप्रययौवीरोनत्वाश्रीसौभरिंमुनिं १ इदंमयातेकथितंगोपीनांचरितंशुभं महापापहरंपुण्यंकिंभूयःश्रोतुमिच्छसि २ ब
हुलाश्वउवाच श्रुतंतवमुखाद्ब्रह्मन्गोपीनांवर्णनंपरं यमुनायाश्चपंचांगं महापातकनाशनं ३ श्रीकृष्णस्सबलःसाक्षाद्गोलो
काधिपतिःप्रभुः अग्रेचकारकांलीलांललितांव्रजमंडले ४ नारदउवाच एकदाचारयन्गाश्चसबलोगोपबालकैः भांडीरेयमु
नातीरेबाललीलांचकारह ५ विहारंकारयन्बालैर्वीरवाहकलत्वगैः विजहारवनेकृष्णोदर्शयन्नाममनोहरां ६ तत्रागतोगो
परूपीप्रलंबःकंसनोदितः तत्तानोबालकैःसोपिहरिणाविष्टितोभवत् ७ विहारविजयंराममेनेतंकोपिनमन्यते उवाहतंप्रलं
वीसौभांडीरायमुनातटे ८ अवरोहणतोदैत्योमथुरांगंतुमुद्यतः दृष्ट्वारचनवद्रूपंगिरींद्रवदुर्गमः ९ बभौबलोदैत्यपृष्ठेस्फुरद्गौ
लोलकुंडलः आकाशस्थेपूर्णचंद्रःसतडिज्जलदेतथा १० दैत्यंभयंकरंदृष्ट्वाबलदेवोमहाबलः कृष्णादत्तमुष्टिनातंशिरस्यद्रिं
ययाभिनत् ११ विशीर्णमस्तकोदैत्योयथावृत्रहतोगिरिः पपातभूमौसहसाचालयन्वसुधातलं १२ तज्ज्योतिर्निर्गतंदीर्घंबले
लीनंबभूवह तदेववर्वृषुर्देवाः पुष्पैर्नंदनसंभवैः १३ अभूज्जयजयारावोदिविभूमौनृपेश्वर एवंश्रीबलदेवस्यचरित्रंपरमाद्भु
तं १४ मयातेकथितंराजन्किंभूयःश्रोतुमिच्छसि बहुलाश्वउवाच कोयंदैत्यःपूर्वकालेप्रलंबोरणदुर्मदः बलदेवस्यहस्तेनयु

20

गा॰सं॰ तदेवं दर्शयामास श्रीकृष्णो रूपमद्भुतं सहस्रभुजसंयुक्तं किरीटकटकोज्ज्वलं ११ शंखचक्रगदापद्मवनमालाविराजितं
मा॰ शुभ्रस्त्वकोटिमार्तंडसंकाशे शेषसंस्थितं १२ वामतो दोलद्दिव्याभैर्ब्रह्माद्यैः परिसेवितं तदैव नन्दोपगणान्पार्षदास्ते गदाधराः १३
१५ सज्जीकृत्वा ननिंकृत्वा हरेस्त्याप्यप्रयत्नतः चकितानिवनान्वीक्ष्य शेचुस्ते पार्षदा गिरा १४ रेरे तल्ली प्रभवन्तमावक्रान्त्वं वनेचराः श्राव
णेमाकृतन्तभो नरहष्टाकिं सभा हरेः १५ वेदा वदंति वाचैवमातत्र देवस्थिते प्रभो इति शिशवो गणाः गोपाः चकिता मौनमास्थिताः १६
मनस्यद्गुरयं कृष्णः उच्चसिंहासने स्थितः श्रुस्वा नृहृदादयः कृत्वास्माभिर्वक्त्रिनक दृश्चित् १७ यस्माद्व्रजाहरं नास्ति कोपि लोको न
सोल्ह्यदः यज्ञानेन स्वमाज्ञापितानस्याहि परस्परं १८ ❋ इति श्रीमद्गर्गाचार्यसंहितायां माधुर्यखंडे नारदबहुलाश्वसंवादे नंदादि 21
वैकुंठदर्शनं नाम द्वाविंशोऽध्यायः २२ ❋ नारद उवाच एकदा नंदगोपालः शाकटे रत्नपूरिते वृषभानुपनंदाद्याश्चाजग्मुश्चाम्बिका
वनं १ भद्रकालीं पशुपतिं पूजयित्वा विधानतः ददुर्दानं द्विजातिभ्यः सुमनास्ते सरित्तटे २ तत्रैकोऽनिर्गतो राज्ञो सर्पो नंदपदे
ग्रहीत् कृष्ण कृष्णेति चुक्रोश नंदोऽतिभयविह्वलः ३ ततोल्मुकैर्गोपैर्बलात्स्तोद्गुरजगरं नृपः यदे सोपि न तत्याज नन्दयोधैस्समग्नि
यथा ४ तत्पादुखपदा सर्पं भगवान्लोकभावनः त्यक्त्वा तदैव सर्पत्वं भूत्वा विद्याधरः कृती ५ नत्वा कृष्णं परिक्रम्य कृतांजलिपु
टो वदत् सर्प उवाच अहं सुदर्शनो नाम विद्याधरवरः प्रभो अष्टावक्रं मुनिं दृष्ट्वा हसितोऽस्मि महाबलः मत्वेशापे दृढो सो पि
त्वं सर्पो भव दुर्मते ७ तत्कृपादय सुकौर्दं कृपया तव माधव त्वन्मादपद्माकुरं दरजः कणानां स्पर्शेन दिव्यपदवी सहसा गतोस्मि
तस्मै नमो भगवते भुवनेश्वराय यो भूरिभारहरणाय भुवोऽवतारः ८ नारद उवाच इति नत्वा हरिं कृष्णं राजन्विद्याधरस्तु सः
जगाम वैकुंठं लोकं सर्वोपद्रववर्जितं ९ नंदाद्या विस्मिताः सर्वे ज्ञात्वा कृष्णं परेश्वरं अंबिकावनतः शीघ्रमाययुर्व्रजमंडले १०
इदं मया ते कथितं श्रीकृष्णचरितं शुभं सर्वपापहरं पुण्यं किं भूयः श्रोतुमिच्छसि ११ ❋ इति श्रीमद्गर्गाचार्यसंहितायां माधु
र्यखंडे नारदबहुलाश्वसंवादे सुदर्शनोपाख्यानं नाम त्रयोविंशोऽध्यायः २३ ❋ नारद उवाच एकदा शैलदेशेषु सवत्सो भगवा १५

22

च पुनस्तान्शेषयामास तत्पत्नीभ्यो हरिः स्वयं यज्ञवाटं पुनर्गत्वा नत्वा विप्रश्रियास्वदा १२ कृतांजलिपुटा ऊचुर्गोपाः कृष्णप्रणो।
दितास्गोपा ऊचुः गोपालबालैः सबलः समागतो गोमार्गरायनृश्रीव्रजराजनंदनः त्वत्संप्रतोस्मि समागमायचेत्तोनाथयत्त्वतास्वन्नम
नेनमोहिने १३ नारद उवाच कृष्णं समागतं श्रुत्वा कृष्णदर्शनलालसाः चतुर्विधान्नपात्रैस्ता नीत्वा सर्वा व्रजोगनाः १४ त्यक्त्वासद्यो
लोकलज्जां कृष्णपार्श्वं समाययुः शशोकानां वने रम्ये कृष्णातीरे मनोहरे १५ पश्चात्श्रुत्वं तत्र याद्रष्टं श्रीहरेरूपमद्भुतं प्राप्यानंदंग-
ताः सर्वास्तुरीयं योगिनो यथा १६ श्रीभगवानुवाच यन्मात्पूर्वं दर्शनार्थमागता हे द्विजांगनाः प्रतियात गृहद्रुतं निःशंका भूमि
देवताः १७ युष्माकं तत्प्रभावेन पतयो वो द्विजोत्तमाः सद्यो यज्ञफलं प्राप्य युष्माभिः सह निर्मलाः १८ गमिष्यंति परं धाम गो।
लोकं योगिदुर्लभं नारद उवाच श्रुत्वा नत्वा हरिं सर्वा आजग्मुर्यज्ञमंडले १९ नारद्दृष्ट्वा ब्राह्मणाः सर्वे स्वात्मानं धिक्प्रचक्रिरे दि-
दृक्षवस्ते श्रीकृष्णं कंसाद्भीता न चागताः २० भुक्त्वान्नं सबलः कृष्णो गोपालैः सह मैथिल गोपालयन्नाजगाम वृंदारण्यं मनोहरं २१
* इति श्रीमद्गर्गाचार्यसंहितायां माधुर्यखंडे नारदबहुलाश्वसंवादे दावाग्निमोक्षविप्रपत्नीदर्शनं नामैकविंशोऽध्यायः २१ *
नारद उवाच एकदा नंदराजोसौ कृत्वा चैकादशीव्रतं द्वादश्यां यमुनां स्नातुं गोपालैर्व्रजमाविशत् १ तं गृहीत्वा पाशिभृत्यः पा
शिलोकं जगाम ह तदा कोलाहले जाते सर्वेषां मैथिलेश्वर २ श्रुत्वा सर्वान्भगवानूचतवान्वारुणीपुरीं भस्मीचकार सहसा
सा पुरी दुर्गे हरिः स्वयं ३ कोटिमार्तंडसंकाशं दृष्ट्वा प्रकुपितं हरिं नत्वा कृतांजलिः पाशी परिक्रम्याग्रतः स्थितः ४ वरुण उवाच न
मः श्रीकृष्णचंद्राय परिपूर्णतमाय च असंख्यब्रह्मांडभृते गोलोकपतये नमः ५ नमस्ते सर्वभावाय परस्मै ब्रह्मणे नमः ६ केना
पि मूढेन मम मानुगेन कृतं परं हेलनमद्य देव तत्क्षमतां भोः शरणागतं मां परेश भूमन्नपरिपाहि पाहि ७ नारद उवाच इति प्र
सन्नो भगवान्नंदं नीत्वा सुपूजितः सोऽल्पप्रकाशायन्वेधून्व्रजमंडलमाययौ ८ नंदराजप्रभावोच्छ्रुत्वा प्रभावं श्रीहरेर्मतन् गोपी
गोपगणा ऊचुः श्रीकृष्णं कृष्णनंदनं ९ यदि त्वं भगवान्साक्षाल्लोकपालैः सुपूजितः दर्शयास्मत्परं रूपं ज्योतिर्मंडलमध्यगं १०

गर्गं॰ नःपुरा २३ गुरुहेलनकृतस्मात्त्वंहूणोभवसुदुर्मते तेनशापाद्धूणोभूर्त्वंवंगादेशेषुमाधव २४ अमरणांतंप्रसंगेनास्मरत्वंग।
मा॰ तवानहं तस्मात्सांदहिप्रक्रोहंशापतोस्वभावतः २५ श्रीकृष्णायनमस्तुभ्यंवासुदेवायतेनमः प्रणतक्लेशनाशायगोविं
१९ दायनमोनमः २६ श्रीनारदउवाच इत्युक्त्वाश्रीहरिंनत्वामालाच्छिष्योहूहुस्ततः यानयन्मवनंराजन्विमानेनदिव्ययो २
इदंमयातेकथितंखंडंमाधुर्यसंज्ञितं २८ सर्वपापहरंपुण्यंकृष्णभक्तिकरंपरं कामदंपठतांशश्वत्किंभूयःश्रोतुमिच्छ
सि २९ ॥ इतिश्रीमद्गर्गाचार्यसंहितायांमाधुर्यखंडेनारदबहुलाश्वसंवादेव्योमासुरवधोनामचतुर्विंशोध्यायः २४ ॥
समाप्तंमाधुर्यखंडम् ॥ पंडितभक्तचंदरामगालिकके छापेखानेमित्रविलासलाहौरमेंछपा ॥ राम राम

ततीयः खंडोयम् ३

23

१९

वानरैः कृत्वा निलायनक्रीडां चोरपालकलक्षणां १ तत्र व्योमासुरो दैत्यो बालान्मेषायितान्बहून् नीत्वा नीत्वा चाद्रिदर्यां विनिद-
ध्य पुनः पुनः २ शिलया पिदधे द्वारं मयपुत्रो महाबलः सप्तचोरं चतं ज्ञात्वा भगवान्मधुसूदनः ३ गृहीत्वा पातयामास गृहीत्वा भूमि-
मंडले तदा मृत्युगतो दैत्यस्तज्ज्योतिर्निर्गतं स्फुरत् ४ दशदिक्षु भ्रमद्राजन् श्रीकृष्णे लीनतां गतं तदा जयजयारावो दिवि भूमौ ब-
भूव ह ५ पुष्पाणि ववृषुर्देवाः परमानंदसंकुलाः बहुलाश्व उवाच कोयं पूर्वं कृशं कृत्व्योमनामा च नहद येन कृष्णे च नश्यमेली-
नोभूद्दामिनी यथा ६ नारद उवाच आसीत्काश्यां भीमरथो राजा दानपरायणः यज्ञकृन्मानदो यज्वी विष्णुभक्तिपरायणः ७ राज्ये
पुत्रे संनिवेश्य जगाम मलयाचले तपस्तेपे समारेभे वर्षाणां लक्षमेव हि ८ तस्याश्रमे पुलस्त्योसौ शिष्यवृन्दैः समागतः तं दृष्ट्वा नो-
त्थितो मानी राजर्षिर्न नतो भवत् ९ शापं ददौ पुलस्त्योपि दैत्यो भव सुदुर्मते ततस्तच्चरणोपांते पतितं शरणागतं १० उवाच मुनि-
शार्दूलः पुलस्त्यो दीनमानसः द्वापरांते माथुरे च प्रदेशे श्रीव्रजमंडले ११ यदुवेशपतेः साक्षात् श्रीकृष्णस्य भुजौजसा ईप्सिता यो-
गिभिर्मुक्तिर्भविष्यति न संशयः १२ नारद उवाच सोयं भीमरथो राजा मयपुत्रो महाबलः आगतो नादयन्वेगात्तान् शृंगैर्वि-
दारयन् १३ गोप्यो गोपा गोगणाश्च वीक्ष्य तं दुद्रुवुर्भयात् भगवान्दैत्यहा देवो माभैष्टेत्यभयं ददौ १४ गृहीत्वा तं तु शृंगेषु नो-
दयामास माधवः सोपि तं नोदयामास श्रीकृष्णं योजनद्वयं पुच्छे गृहीत्वा तं कृष्णो भ्रामयित्वा भुजौजसा भूपृष्ठे पोथयामास
कमंडलुमिवार्भकः अरिष्टः पुनरुत्थाय कोपसंरक्तलोचनः शृंगैरुद्धारितं शैलं समुत्थाप्य महाबलः १७ जगर्ज घनवद्धी-
रः कृष्णस्योपरि समाक्षिपत् कृष्णः शैलं संगृहीत्वा तस्योपरि समाक्षिपत् १८ शैलस्यापि प्रहारेण किंचिद्व्याकुलमानसः भूमौ
तलाच्छृंगाग्रान्निर्गतं तैजसं भुवः १९ श्रीकृष्णस्तं च शृंगेषु गृहीत्वा भ्रामयन्मुहुः भूपृष्ठे पोथयामास वोभ्यं पद्ममिवोद्धृतं २०
तदैव वृषरूपं त्यक्त्वा विप्रवपुर्धरः नत्वा श्रीकृष्णपादाब्जं प्राह गद्गदया गिरा २१ द्विज उवाच बृहस्पतेश्च शिष्योहं वरतंतुर्हि
जोत्तमः बृहस्पतिसमीपेहं पठितं गतवान्पुरा २२ पादौ कृत्वास्थितो भूत्वं पश्यतस्तस्य सन्मुखे तदानादृत्य गुरुर्निर्ह्वेषवत्संस्थि

गर्ग॰ ततस्तं नरथीपनादिगिरिं १४ नंदोपनंदा वृषभानवश्च बलः सनंदो वृषभानवश्च श्रीनंदराजश्च हरिश्च गोपाः गोप्यश्च सर्वा निजगोध
गि॰ नेषु १५ द्विजाश्च योगेश्वरसिद्धिसंघाः शिवादयश्चान्यजनाश्च सर्वे नत्वाथ संपूज्य गिरिं प्रसन्नाः स्वंस्वं ग्रहं जग्मुरनिच्छयाच श्रीकृष्ण
२ वंदस्य परं च विचित्रं गिरींद्रराजस्य महोत्सवं च मया तवाग्रे कथितं विचित्रं नृणां महापापहरं पवित्रं १७ ॥ इति श्रीमद्गर्गाचार्यसंहिता 25
यां श्रीगिरिराजखंडे द्वितीयोध्यायः २ ॥ श्रीनारद उवाच अथेंद्रो मन्मखात् ज्ञात्वा स्वात्मयागस्य नाशनं गोवर्द्धनोत्सवं जातं कोपं
चक्रे पुरंदरः १ सांवर्तकं नाम गणं प्रलये मुक्तबंधनं इंद्रो व्रजविनाशाय प्रेषयामास सत्वरं २ अथ मेघगणाः क्रुद्धा घनैस्तच्चित्र
वर्णिनः कृष्णभाः पीतभाः केचित्केचिद्धरितप्रभाः ३ इंद्रगोपनिभाः केचित्केचित्सिंदूरसन्निभाः केचित्कर्पूरमेघाभा नीलपं
कजप्रभाः ४ हस्तितुल्यान्वारिबिंदून्ववृषुस्ते मदोद्धताः हस्तिशुंडसमाभिश्च धाराभिश्च बलाचया ५ निपेतुः कोटिशश्चाद्रि
कूटतुल्योपला भृशं वाता ववुः प्रचंडाश्च दोपयंतस्तरून्गृहान् ६ प्रचंडवज्रपातानां मेघानामंतकारिणां महाशब्दोऽभवद्भूमौ
मैथिलेंद्र भयंकरः ७ तन्नादतेन ब्रह्मांडं सप्तलोकैर्बिलैः सह विचेलुर्दिग्गजास्तारा यत्भूखंडमंडले ८ भयभीतास्तगोपमुख्या
स्त्रान्४ सकुटुंबा जितगोधनाः शिशून्स्वांस्तु पुरस्कृत्य नंदमंदिरमाययुः ९ श्रीनंदमंदिरं गत्वा सबलं परमेश्वरं ऊचुर्व्रजौकसः सर्वे भया
त्तांश्शरणं गताः १० राम राम महाबाहो कृष्ण कृष्ण व्रजेश्वर पाहि पाहि महाकष्टादिंद्रान्नित्यानुजनान् ११ हित्वेंद्रयागं त्वद्वाक्या ८४
त्कृतं गोवर्द्धनोत्सवं अथ शक्रे प्रकुपिते कर्तव्यं किं वदाशु नः १२ नारद उवाच व्याकुले गोकुले वीक्ष्य गोपीगोपालसंकुले स
गोकुले गोकुलेशो गोपानाह निराकुलः १३ श्रीभगवानुवाच मा भैष्ट यातनादितं सर्वैः परिकरैः सह वः पूजाप्रहता येन स रक्षांसे
विधास्यति १४ नारद उवाच इत्युक्त्वा स्वजनैः सार्द्धमेत्य गोवर्द्धनं हरिः तमुत्पाद्य दधानाद्रिं हस्तेनैकेन लीलया १५ यथोच्छिलीं
ध्रं शिशुरुच्चसो गजः सपुष्करेणैव च पुष्करं गिरिं धृतवान्भो श्रीव्रजराजनंदनः कृपाकरो लोककरुणामयः प्रभुः १६ अथाह गोपान्
विश्लिनाद्रिगर्ते हेतानमातर्व्रजवल्लवेशाः सोपस्करैः सर्वधनैश्च गोभिरत्रैव शक्रस्य भयेन किंचित् १७ इत्थं हरेर्वचः श्रुत्वा गोपगो २

श्रीगणेशाय नमः श्रीबहुलाश्व उवाच कथं त्वया भगवान् गिरिं गोवर्द्धनं परं उद्धृतं लीलया यथा बालो हस्तेनैकेन लीलया १ परि
पूर्णतमस्य साक्षाच्छ्रीकृष्णस्य महात्मनः तद्दिव्यचरितं दिव्यमद्भुतं श्रुतिसत्तम २ नारद उवाच वार्षिकं दैविकं राजन्तेयया शक्राय वै। ६
तथा बलिं दत्तुं प्रवृत्तं ते गोपाः सर्वे कृष्णबलाः ३ महेंद्रयागसंभारं वर्यं दृष्ट्वा कदा हरिः नंदं पप्रच्छ सदसि वल्लभानां च शृण्वतां
श्रीभगवानुवाच कस्यापि पूजनं ह्येतत् किं फलं चापि विद्यते लौकिकं वा वदस्मे तत्तथा वा पारलौकिकं ५ नंद उवाच शक्रस्य
पूजनं ह्येतद्भुक्तिमुक्तिकरं परं एतद्विना नरो भूमौ जायते न सुखी क्वचित् ६ श्रीभगवानुवाच शक्रादयो देवगणाश्च सर्वे तोषं जं।
निये स्वर्गं स्वे स्वे कर्मभिः विशंति ते मर्त्यपदं शुभतयेतत्सेवनं विद्धि न मुक्तिकारणं ७ भवं भवेद्धै परमेष्ठिनो यतो वालोत्तका।
कौ दिन तत्कृतात्मनां तस्माच्च यं कालमनंतमेव हि महाबलिष्ठं समुपाविशुः परे ८ ततस्तमाश्रित्य स्वकर्मभिः परं भजेद्धरिं य-
न्नृपतिं स्वेश्वरं विसृज्य सर्वं मनसा कृतं तत्फलं व्रजेत्परं मोदमसौ न चान्यथा ९ गोविप्रसाध्वग्निसुराश्च तिस्त्रया यथर्मश्चयज्ञाधिप
तेर्विभूतये चिस्थे पुत्रैते श्रीहरिं भजंति ये सदा विहाय वस्तु सर्वं व्रजंति ते १० अस्युस्थितो वै हरिवक्षसो गिरिर्गोवर्द्धनो नाम गिरींद्रराज
राट् समागतो लक्ष्य पुलस्त्यतेजसा यद्दर्शनाज्जन्म पुनर्न विद्यते ११ संपूज्य गोविप्रसुरान्महाद्रिं पेटात्तु मदेव परं स्वपायने यतः
श्रियो मे मतं राजन्नेव हि न चेद्यथेच्छास्ति तथा कुरु व्रजे नारद उवाच तेषां मध्येति संनंदो गोपवृद्धोतिनीतिवित् श्रुतिश्रवनः
श्रीकृष्णं मदानंदाय शृण्वते १३ श्रीसंनंद उवाच हे नंदसूनो हे तात त्वं साक्षान्महान् शिवविधिः कर्तव्यस्तेन विधिना पूजा वदस्व तत
नः १४ श्रीभगवानुवाच शालिग्रामये ना गिरिराजमुखं स्थपः प्रेताय सर्वसंभारं भक्तियुक्तो जितेंद्रियः १५ सहस्रशीर्षामं
त्रेण हृदयं स्नानं समाचरेत् गंगाजलेन यमुनाजलेनापि द्विजैः सह १६ दुग्धगोत्रस्य धाराभिस्ततः पंचामृतैर्गिरिं स्नापयित्वा गंध
पुष्पैः पुनः स्नानं जलेन वै १७ वस्त्रं दिव्यं च नैवेद्यमासनं सर्वतोथिकं मालालंकारनिचयं पुष्पतादीपवलिं परं १८ ततः प्रदक्षिणाः
कुर्यान्नमस्कुर्यात्ततः परं कृतांजलिपुटो भूत्वा विदमेव मुदीरयेत् १९ नमो वृंदावनांकाय तुभ्यं गोकुलमौलये पूर्णब्रह्मातपत्रा

गर्ग॰ गि॰ १

यनमो गोवर्द्धनाय च १० पुष्पांजलिं ततः कुर्यान्नीराजनमतः परं चंद्राकांश्चमदंगाद्यैर्वादित्रैर्मधुरस्वनैः ११ वेदाहमेतंमं
त्रेणावर्षीलाजैः समाचरेत् तत्समीपे चान्नकूटं कुर्याच्छ्राद्धसमन्वितः १२ कचोलानांचतः षष्टिं पंचपंक्तिसमन्वितः तत्र
सीदलमिश्रैश्च श्रीगंगायमुनाजलैः १३ षट्पंचाशत्शतैर्भोगैः कुर्यात्सेवां समाहितः ततोग्नीन्ज्वाल्यशाल्युज्ज्वलाः सुरानांधपु
ष्पकैः १४ भोजयित्वाद्विजवरान्सोगंधैर्मिष्टभोजनैः श्वभ्येभ्यश्चाश्वपाकेभ्योदधिभोजनमुत्तमं १५ गोपीगोपालवृंदैश्च गवां
नर्तनं च कारयेत् मंगलैर्जयशब्दैश्च कुर्याद्गोवर्द्धनोत्सवं १६ यत्र गोवर्द्धनाभावः तत्र पूजाविधिं शृणु गोमयैर्गोधनैः कार्यस्तु
दाकारः परोन्नतः १७ पुष्पाद्यैस्तैर्लतापुष्पैरिषीकाभिः समन्वितः पूजनीयः सदाभक्तैः गिरिर्गोवर्द्धनो भुवि १८ शिलासमानेत्र
रंदिव्यादीतच्छिलां नयेत् गृह्णीयाद्योविना स्वर्णं समं हारीरवं व्रजेत् १९ सालिग्रामस्य देवस्य सेवनं कारयेत्सदा पातकं न
स्पृशेत्तं वै पद्मपत्रे यथा जले २० गिरिराजशिलासेवां यः करोति द्विजोत्तमः सप्तद्वीपमहीतीर्थावगाहफलमेति सः २१ गिरिराजम
हापूजां वर्षे वर्षे करोति यः इहसर्वं सुखं भुक्त्वा सोमुत्रमोक्षं प्रयाति सः २२ ॥ इति श्रीमद्गर्गाचार्यसंहितायां श्रीगिरिराजखंडे नारद
बहुलाश्वसंवादे गिरिराजपूजावर्णनं नाम प्रथमोध्यायः १ ॥ नारद उवाच श्रुत्वा वचो नंदसुतस्य साक्षात् श्रीनंदनंद व व्रजे स
शाः सुविस्मिताः पूर्वकृतं विहाय प्रचक्रिरे श्रीगिरिराजपूजां १ नीलाचलिं मैथिलनंदराजः सुतैः समानीयच रामकृष्णौ य
शोदया श्रीगिरिपूजनार्थं समाययौ गर्गयुतः प्रसन्नः २ नंदोपनंदो वृषभानवश्च पुत्रैश्च पौत्रैश्च महांगनाभिः समाययुः श्री
गिरिराजपार्श्वं सर्वैः समानीय च यज्ञभारं ३ तं रं समारुह्य महोन्नतं गजं विचित्रवर्णं धृतहेमकंबलं गोवर्द्धनं तं प्रययौ नवांगणैः
शरद्घनैः शक्र इव प्रियायाः ४ सहस्रबालार्कपरिस्फुरद्युतिमारुह्य राधा शिबिकां सखीगणैः शचीव दिव्याम्बररत्नभूषणा वभौ
वकोटिभ्रमरैः समाकुला ५ समागते पार्श्वगते स्वलंकृते राजन्सखीकोटिसमावृते परे सख्यौ विभाते ललिता विशाखे चंद्रान
ने चालितचारुचामरे ६ एवं रमा वैविरजा च माधवी माया च कृष्णा नृपजं ह्नुनंदिनी द्वात्रिंशदष्टौ वतथाहि षोडश सख्यश्च ता १

27

सोकिलपृथगागताः ७ श्रीमैथिलानांकिलकौशलानांतथाफलीनामृषिरूपकानां तथात्वयोध्यापुरवासिनीनांश्रीयज्ञ।
सीतापुरवासिनीनां ८ रमादिवैकुंठनिवासिनीनांततोर्द्ध्ववैकुंठनिवासिनीनां महोज्वलद्वीपनिवासिनीनांध्रुवादिलोकाचल
वासिनीनां ९ समुद्रजादिव्यगुणाश्रयाणामदिव्यवैमानिकजोषधीनां जालंधरीणांवृसमुद्रकन्यावर्हिष्मतीनांसुतलस्थिता
नां १० तथापरःसर्वफणीन्द्रनानामासांवसुधाव्रजवासिनीनां समाययुश्रीगिरिराजपार्श्वं स्वलंकृतापाणिवलिप्रदीपाः ११ गो
पाश्चवृद्धाःशिशवोयुवानःपीतांवरोष्णीषसवर्हिमंडिताः श्रीहारगुंजावनमालिकाभिःरेजुः समेतानवयष्टिवेणुभिः १२ फलो
त्सवेशैलवरस्यमन्मथात्गंगाधरोवृद्धकपर्दमंडलः कपालभृद्वस्थिजभस्मभूषितः सर्पालिमालावलयैर्विभूषितः १३ धतूरा
भंगाविषपानविह्वलोहिमादिपुत्रीसहितोगणावृतः आरूढनंदीश्वरमादिवाहनंसमाययौश्रीगिरिराजमंगलं १४ राजर्षिविप्र
र्षिसुरर्षयश्चसिद्धेशयोगेश्वरहंसमुख्याः आजग्मुराराद्गिरिदिशोनाथंसहस्रशोविप्रगणाःसमेताः १५ गोवर्द्धनोरत्नशिलामयो
भूत्सुवर्णशृंगैःपरितःस्फुरद्भिः मत्तालिभिर्निर्झरसुंदरीभिःदरीभिरुच्चांगकरीवराजन् १६ तद्देवशैलांकिलमूर्तिमंतःसो
पायनामेरुहिमाचलाद्याः नेमुर्गिरिंमंगलपाणयस्तेगोवर्द्धनेरूपधरंगिरीन्द्राः १७ द्विजैश्चगोवर्द्धनदेवपूजनंकृत्वाच्युतोक्ते
द्विजवद्भिगोधने संपूज्यचक्रायमहाधनंवलिंगोपैर्व्रजेशोगिरयेव्रजेश्वरः १८ नंदोपनंदैर्वृषभानुभिश्चगोपीजनैर्गोपगणैः
प्रहर्षितैः गायद्भिरानर्तनवाद्यतत्परैःचकारकृष्णोदिवपद्दक्षिणां १९ देवेषुवर्षत्सवपुष्पवर्षांजनेषुवर्षत्सुचलाजसंचं ये
जेमहाराजइवाधिराजैः गोवर्द्धनोनामगिरिन्द्रराजराट् २० कृष्णोपिसाताव्रजशैलमध्याद्भूत्वातिदीर्घंकिलचान्यरूपं शैलो।
स्मिलोकानितिवादयन्नृपगैःजवासमसर्वेकृतमन्नकूटं २१ गोपालगोपीगणवृंदमुख्याःकृष्णस्यसंवीक्ष्यगिरेःप्रभावं हातंवरंत
वसमुद्यंतेतेस्वविस्मिताहर्षितमानमास्ते २२ ज्ञातोसिगोपैर्गिरिराजदेवपद्दर्शितोनेदसतेनसाक्षात् तोगोधनंवाकिलवंधु
वर्गीवृद्धिंसमायातदिनेदिनेको २३ तथास्त्वचोक्त्वागिरिराजराजोगोवर्द्धनोदिव्यवपुर्दधानः किरीटकेयूरमनोहरांगःतगो

गर्गी॰
गि॰
३

श्च श्रुद्धैर्व्रजातः परिपूर्णतमे वैकुंठसादि देवैर्दुःखविनाशनाय ३ ॐनमो गोवर्द्धनोद्धरणाय गोविंदाय गोपीजननिवासाय गोकुलनि
वासाय गोपालाय गोकुलपतये गोपीजनभर्त्रे गिरिराजोद्धर्त्रे करुणानिधये जगद्धितये जगन्मंगलाय जगन्निवासाय जगन्मोह
नाय कोटिमन्मथमन्मथाय वृषभानुसुतावराय श्रीनंदराजकुलप्रदीपाय श्रीकृष्णाय परिपूर्णतमाय तस्मै असंख्यब्रह्मांडपतये गो
लोकधामधिषणाधिपतये स्वयं भगवते सबलाय नमस्तेनमस्ते श्रीनारद उवाच इति शक्रकृतं स्तोत्रं प्रातरुत्थाय यः पठेत्
सर्वसिद्धिर्भवेत्तस्य संकटान्न भयं भवेत् १० इति स्तुत्वा हरिं देवं सर्वैर्देवगणैः सह कृतांजलिपुटो नम्रः प्रणनाम पुनः पुनः ११
सुरभिर्गोवर्द्धने रम्ये स्वराभिर्गोसमुद्भवा स्नापयामास गोपेशं दुग्धधाराभिरात्मनः १२ शुंडादंडैस्तुतभिश्च स्वर्गंगाजलपूरितैः श्री
कृष्णं स्नापयामास मत्त ऐरावतो गजः १३ कृष्णाभिषेके संजाते गिरिर्गोवर्द्धनो महान् द्रवीभूतो वहद्राजन् हर्षानंदादितस्ततः १४
प्रसन्नो भगवान् तस्मिन् कृतवान् हस्तपंकजं तद्धस्तचिह्नमद्यापि दृश्यते तद्गिरौ नृप १५ तत्तीर्थं च परं भूतं नराणां पापनाशनं तत्रै
व पादचिह्नं स्यान्नमार्थं विद्धि मैथिल १६ ऐरावतस्य तत्रैव पादचिह्नं बभूव ह स्वरभिः पादचिह्नानि बभूवुस्तत्र मैथिल १७ स्वर्गं
गाजलपातेन कृष्णस्नानेन मैथिल तेन वै मानसीगंगा गिरौ जाताऽघनाशिनी १८ सुरभिदुग्धधाराभिर्गोविंदस्नानतो नृप जा
तो गोविंदकुंडोऽसौ महापापहरः परः १९ कदाचित्तस्मिन्दुग्धस्वादु पेयं जलेऽस्ति च तत्र स्नानान्नरः साक्षाद्गोविंदपदमाप्नुयात् २०
पदचिह्नानि कृत्वा हरिं प्रणम्य दत्वा बलिं तत्र पुरंदरोऽपि जयध्वनिं कृत्वा सपुष्पवर्षिणां ययुः स्वर्गं सोऽप्युपनाकं त्रिविष्टपं २१ कृष्णाभि
षेकस्य कथां शृणोति यो दशाश्वमेधावभृथादिके फलं प्राप्नोति राजेंद्र स एव भूयः परं पदं याति परस्य वेधसः २२ ॥ इति श्री
गर्गाचार्यसंहितायां गिरिराजखंडे नारदबहुलाश्वसंवादे श्रीकृष्णाभिषेको नाम चतुर्थोऽध्यायः ४ ॥ श्रीनारद उवाच एक
दा सर्वे गोपालाः गोप्यो नंदसुतस्य तत् अद्भुतं चरितं दृष्ट्वा नंदमाहुर्यशोमतीं १ गोपा ऊचुः हे गोपराज त्वद्वंशे कोऽपि जातो न चा
द्भुतक न तत्समस्त्वं शिलां धत्ते सप्ताहं वै यशोमति २ कंसं महाबलं बालः कुद्धिराजस्य धारणं तेन नो जायते शंका न वयं च म ३

29

यनसंयुताः सकुटुंबोपकरैः प्रविविशुः श्रीगिरेस्तले १८ वयस्याः बालकाः सर्वे कृष्णोक्तास्तु बलान्नृप स्वान्स्वाँल्लकुटानद्रेर्
वष्टंभान्प्रचक्रिरे १९ जलौघमागतं वीक्ष्य भगवांस्लक्ष्मिरेरथः सुदर्शनं तथा शेषं मनसाज्ञां चकार ह २० कोटिसूर्यप्रभं चाद्रेरूर्द्ध्वं चक्रे
सुदर्शनं धारासंपातमपिबदगस्त्यइव मैथिल २१ अधोयस्तगिरिं शेषः कुंडलीभूतआस्थितः रुरोधतज्जलं दीर्घं यथावेला महोद
धिं २२ सप्ताहं सुस्थिरस्तस्थौ गोवर्द्धनधरो हरिः पश्यंतः श्रीकृष्णचंद्रं चकोरा इव संस्थिताः २३ मत्तमैरावतं नागं समारुह्य पुरंदरः
ससैन्यः क्रोधसंयुक्तो व्रजमंडलमाययौ २४ हस्तस्थितेपवज्रं स्वं नंदगोष्ठजिघांसया स्तंभयामास वज्रस्य सवज्रं माधवो करं २५
भयभीतस्तदा शक्रः सांवर्तकगणैः सह दुद्राव सहसा देवैर्यथेभः सिंहताडितः २६ तदैवार्कोदयो जातो गता मेघा इतस्ततः वा
ताः उपरता सद्यो नद्यः स्वल्पजलान्नृप २७ विपंकं भूतलं जातं निर्मलं खं बभूव ह चतुष्पदाः पक्षिगणाः सुखमापुस्ततस्ततः २८
हरिणोक्तास्तदा गोपा निर्ययुः गिरितस्ततः तेनमाहूस्थलीर्गोवृ धारयामोदिमोजसा २९ इति वादपरान्गोपान्गोवर्द्धनधरो हरिः
नर्ईच गिरिर्भारंशदाते भ्यो महामनाः ३० पतितास्तेन भारेण गोपबालाश्च निर्बलाः करेण तान्समुत्थाप्य स्वस्थाने पूर्ववद्गिरिः ३१
सर्वेषां पश्यतां कृष्णः स्थापयामास लीलया तदैव गोपीगणा गोपमुख्या संहृष्टाः कृष्णं नपनंदहूनं गंधाक्षतैर्दधिदूर्वाभोगैः
ज्ञात्वा परेशं तुरतीव सर्वे ३२ नंदो यशोदा नृप रोहिणी च बलश्च सानंदसुरोष्टहृद्गः आलिंग्य कृष्णं प्रददुर्यथालिशुभाशिषः स
युयु जहृष्णाताः ३३ संप्राप्याते गायनवाद्यतत्पराः नृत्यंतश्चारान्नृपनंदनंदनं आजग्मुरेवं स्वगृहान्व्रजौकसो हरिं प्रशस्य सम
मीरयंगताः ३४ तदैव देवाः ववृषुः प्रहर्षिताः पुष्पैः शुभैः सुंदरनंदनोद्भवैः जगुर्यशः श्रीगिरिराजधारिणो गंधर्वमुख्या दिवि
सिद्धसंघाः ३५ ॐ इति श्रीमद्गर्गाचार्यसंहितायां गिरिराजखंडे नारदबहुलाश्वसंवादे तृतीयोऽध्यायः ३ ॐ नारद उवाच अथ
देवगणैः सार्द्धं शक्रस्तत्र समागतः गतमानो गुरौ कृष्णे रहसि प्रणनाम ह १ इंद्र उवाच त्वं देवदेवः परमेश्वरेश्वरः पूर्णः पुराणः पु
रुषोत्तमोत्तमः परात्परस्त्वं प्रकृतेः परो हरिर्मां पाहि पाहि द्विजपते जगत्पते २ दशावतारो भगवान्नृ त्वमेव रिरक्षणार्थं मगवांछतेः

30

गर्गं॰ षभानुपुरंगताः सर्वेषांपश्यतांतेषांदेवैर्भवेद्व्रजगुर्जरेषु ३२ तदातिविस्मिताःसर्वेज्ञात्वानंदसुतंहरिं वृषभानुवरंनेमुर्निःसंदेहंव्रजौक
गि॰ सः ३३ राधाहरेःप्रियाज्ञात्वाराधायास्तुप्रियोहरिः ज्ञातोव्रजजनैःसर्वैःतद्दिनान्मैथिलेश्वर ३४ मुक्ताक्षेपःकृतोयेनहरिणानंदसूनु २९
५ ना मुक्तासरोवरस्तत्रजातोमैथिलतीर्थराट् ३५ एकंमुक्ताफलंयापिदानेतत्रकरोतियः लक्षमुक्तादानफलंसंप्राप्नोतिनसंशयः
एवंतेकथितोराजन्गिरिराजमहोत्सवः भुक्तिमुक्तिप्रदोनृणांकिंभूयःश्रोतुमिच्छसि ३६ ॥ इतिश्रीमद्गर्गसंहितायांगिरिरा
जखंडेनारदबहुलाश्वसंवादेमुक्तातीर्थवर्णनोनामसप्तमोध्यायः ६ ॥ बहुलाश्वउवाच कतिमुख्यानितीर्थानिगिरिराजेमहात्मनि 31
एतद्ब्रूहिमहायोगिन्साक्षाद्दिव्यदर्शनः १ नारदउवाच राजन्गोवर्द्धनःसर्वःसर्वतीर्थवरःस्मृतः वृंदावनंचगोलोकेमुकुटेदिव्यपूजि
तः २ गोपगोपीगवांरक्षाप्रदःकृष्णप्रियोयतः पूर्णब्रह्मातपत्रोयस्तस्मात्तीर्थवरोभवत् ३ इंद्रयागंविनिर्भर्त्स्यसर्वैःनिजजनैःसह
यत्पूजनंसमारेभेभगवान्भुवनेश्वरः ४ परिपूर्णतमःसाक्षाच्छ्रीकृष्णोभगवान्स्वयं असंख्यब्रह्मांडपतिःगोलोकेशःपरात्परः ५
यस्मिन्स्थितःसदाक्रीडामर्भकैःसहमैथिल करोतितस्यमाहात्म्यंवक्तुंनालंचतुर्मुखः ६ यत्रैवमानसीगंगामहापापौघनाशिनी
गोविंदकुंडोविशदःशुभश्चंद्रसरोवरः ७ राधाकुंडःकृष्णकुंडोललिताकुंडएवच गोपालकुंडंतत्रैवकुसुमाकरएवच ८ श्री
कृष्णमौलिसंस्पर्शान्मौलिचिह्नाशिलाभवत् तस्यदर्शनमात्रेणदेवमौलिर्भवेज्जनः ९ यस्यांशिलायांकृष्णेनचित्राणिलिखिता
निच अद्यापिचित्रितापुण्यानाम्नाचित्रशिलागिरौ १० यांशिलामर्भकैःकृष्णोवादयन्क्रीडनेरतः वादनीसाशिलाजातामहापा
पौघनाशिनी ११ यत्रश्रीकृष्णचंद्रेणगोपालैःसहमैथिल कृतावैकंदुकक्रीडातत्तीर्थंकौतुकंस्मृतं १२ दृष्ट्वाशक्रपदंयातिनत्वात्र
लपदंचतत् विलुंठन्यस्यरजसासाक्षाद्विष्णुपदंव्रजेत् १३ गोपानामुष्णिषंहरेयत्रचौरयामाससमाधवः औष्णिषंनामतत्तीर्थंमहापाप
हरंगिरौ १४ तत्रैकदावैदधिविक्रयार्थंविनिर्गतोगोपवधूसमूहः श्रुत्वाक्वणन्नूपुरशब्दमाराद्रुरोधतन्मार्गमनंगमोही १५
वंशीधरोवेत्रवरेणगोपैःपुरस्थितांसाविनिधायपादं मह्यंकरादानवतायदानंदेहीतिगोपीर्निजगादमार्गे १६ गोप्यऊचुः वक्र ५

हावले ३ अयं विप्रः कृतिरिवं पुत्रं रमागतादिव उक्तिलीयं यथा बालो ह्यनेनैकेन लीलया ४ नहि स्तनवियोगं नव बालयत्नादृशो
यथा बलभद्रेन दोषं स्याच्चूर्णं वंशसमुद्भवे ५ नामैस्याः गोकरिष्यामो यदि सम्यं न भाषसे गोपेषु वास्य चोन्यत्र वदेश्चेन्न कलिर्भवे
त् ६ नारद उवाच श्रुत्वा गोपालवचनं यशोदाभयविह्वला नंदराजस्तथा शङ्क्य गोपान्कोपशङ्कितान् ७ नंदराज उवाच गर्ग
स्त्ववाक्यं हे गोपाः न दिव्यामि समाहितः येन गोपगणाः पूर्वं भवतां स्वगतव्यथाः ८ ककारः कमलाकान्तः ऋकारो राम इत्यपि ष
कारः षड्गुणपतिः श्वेतद्वीपनिवासकृत् ९ णकारो नरसिंहोयमकारो ह्यक्षरोऽग्निभुक् विसर्गौ च तथा ह्येतौ नरनारायणावृषी १०
संप्रलीनाश्च षट्पूर्णा यस्मिन्शब्दे महात्मनि परिपूर्णतमे साक्षात्तेन कृष्णः प्रकीर्तितः ११ शुक्लो रक्तस्तथा पीतः वर्णोस्यानुयुगं
धृतः द्वापरान्ते कलेरादौ बालोयं कृष्णतां गतः १२ तस्मात्कृष्ण इति ख्यातो नाम्नायं नंदनंदनः वसुदेवेऽद्रियाणीति तदेवस्थित एव
हि १३ तस्मिन्पक्षे हि तेनैषोऽपि वासुदेव इति स्मृतः वृषभानुसुता राधा या जाता कीर्तिमंदिरे १४ तस्याः पतिः परः साक्षात्तेन राधापतिः स्मृ
तः परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान्स्वयं १५ असंख्यब्रह्माण्डपतिर्गोलोके धाम्नि राजते सोयं नव शिशुर्जातो भारावतरणाय
च १६ कंसादीनां वधार्थाय भक्तानां रक्षणाय च अनेकान्यस्य नामानि वेदगुह्यानि भारत १७ लीलाभिश्च भविष्यन्ति तत्कर्मसु न
विस्मयः इति श्रुत्वात्मजे गोपाः संदेहेन करोम्यहं १८ वेदवाक्यं ब्रह्मवचः प्रमाणं हि महीतले गोपा ऊचुः यथागतस्त्ववरहेश।
गर्गाचार्यो महामुनिः तत्क्षणे नामकरणे नाहूता वयमिस्त्वया २० स्वगेहे नामकरणं भवता न कृतं शिशोः तव चैतादृशी रीतिर्गुप्तं
सर्वं गृहेषु यत् २१ नारद उवाच एवं वदंतस्ते गोपा निर्गता नंदमंदिरात् वृषभानुपुरं जग्मुः क्रोधपूरितविग्रहाः २२ वृषभानुवरं
साक्षान्नंदराजसहायकं प्राहुर्गोपगणाः सर्वे ज्ञातेर्मदसमन्विताः २३ गोपा ऊचुः वृषभानुवरस्त्वं वै ज्ञातिमुख्यो महामनाः नंदराजं
त्यजताद्यैत्वं गोपेश्वर भूपते २४ वृषभानुरुवाच को दोषो नंदराजस्य ज्ञातेस्त्वं संत्यजाम्यहं गोपेषु ज्ञातिमुख्यो नंदराजो मम प्रियः २५
गोपा ऊचुः न वेत्स्यजस्मितं राजन्नूनं जामस्त्वा ब्रजौकसः तच्छ्रेवर्त्तनैकं मोहाद्दर्पीयसा महामते २६ भवता ज्ञातिमुख्येन संवद्भुन्मद

६८

गर्गा॰ गि॰ ५ शालिना तस्मा वरश्रुत्वाथ कलुषं तव विद्यते २० अथ नंदो ज्ञातिसंभ्रष्टं पृथक्कन्यामदेवयं ज्ञातेः शीघ्रं नंदराजं संजन्यजनसदृ 33
मते १८ वृषभानुरुवाच गर्गस्य वाक्यं हे गोपाः वदिष्यामि समाहिताः येन गोपगणा यूयं भवताश्च गतव्यथाः १९ अस्त्येव ब्रह्मां
डपतिर्गोलोकेशः परात्परः तस्मात्परो वरो नास्ति जातो नंदगृहे शिशुः २० भुवो भारावतारायकंसादीनां वधाय च ब्रह्मणा प्रार्थि
तः कृष्णो बभूव जगतीतले २१ श्रीकृष्णपट्टराज्ञी या गोलोके राधिकाभिधा वृषभानुगृहे सापि संजाता त्वं न जानासि तां परां २२ अहं न
कारयिष्यामि विवाहमनयोर्नृप तयोर्विवाहो भविता भांडीरे यमुनातटे २३ वृंदावनसमीपे च निर्जने सुंदरस्थले परमेष्ठी।
समागत्य विवाहं कारयिष्यति २४ तस्माद्राधां गोपवर विद्ध्यर्धांगीं परस्य च लोकचूडामणेः साक्षाज्ज्ञाता गोलोकमंदिरे २५
वयं सर्वेपि गोपाला गोलोकादागता भुवि तथा गोपीगणा गावो गोलोके राधिकेप्सया २६ एवं श्रुत्वा गते साक्षाद्गर्गाचार्ये महामु
नौ तद्दिनाद्यस्य पापांसंदेहं न करोम्यहं २७ वेदवाक्यं ब्रह्मवचः प्रमाणं हि महीतले इति वः कथितं गोपाः किं भूयः श्रोतुमिच्छ
थ २८ ॥ इति श्रीमद्गर्गाचार्यसंहितायां गिरिराजखंडे नारदबहुलाश्वसंवादे गोपविवादो नाम पंचमोऽध्यायः ५ ॥ नारद उ
वाच वृषभानुवरस्येदं वचः श्रुत्वा व्रजौकसः पुनः ऊचुः शांतिगता विस्मिताः छिन्नसंशयाः १ गोपा ऊचुः समीचीनं वचो राज
न् राधेयं तत्र हरिप्रिया तस्य भावेन ते दीर्घं वैभवं दृश्यते भुवि २ सहस्रशो गजा मत्ताः कोटिशोश्वाश्च चंचलाः रथाश्च देवधिष्ण्याभाः
शिविकाः कोटिशः शुभाः ३ कोटिशः कोटिशो गावो हेमरत्नमनोहराः मंदिराणि विचित्राणि रत्नानि विविधानि च ४ सर्वं सौ
ख्यं भोजनार्थं दृश्यते तव संस्कृतं कंसोपि धर्षितो जातो दृष्ट्वा ते बलमद्भुतं ५ कान्यकुब्जपतेः साक्षाद्भलंदननृपस्य च जामाता ते
महावीरः कुबेर इव कोशवान् ६ तस्य सर्वं वैभवं नास्ति नंदराजगृहे क्वचित् कृषीवलो नंदराजो गोपतिर्दीनमानसः ७ यदि
नंदसुतः साक्षात्परिपूर्णतमो हरिः सर्वेषां पश्यतां न स्यात्परीक्षां कारय प्रभो ८ नारद उवाच तेषां वाक्यं ततः श्रुत्वा वृषभानु
वरो महान् चकार नंदराजस्य वैभवस्य परीक्षणं ९ कोटिदामानि मुक्तानां स्थूलानां मैथिलेश्वर एकैकायाः सुमुक्तायाः कोटिमौल्या। ४

स्फुरत्प्रभाः १० निधायतानिपात्रेषुहरिणानैकशालजैः प्रेषयामासनंदायसर्वेषांपश्यतांनृप ११ नंदराजसभांगत्वाहरिणानांकु
शलाभृशं निधायदामपात्राणिनंदमाहुःशृणुमते १२ हरिणानाऊचुः विवाहयोग्यांनवकंजनेत्रांकोटिंदुबिंबद्युतिमादधानां
विज्ञायराधांवृषभानुपुत्र्यैस्वकेविचारंस्थविरंविचिन्वन् १३ नवांगजेदिव्यमनंगमोहनंगोवर्द्धनोद्धारणदोःसमुद्भवं संवीक्ष्य
वास्मान्वृषभानुवंदिनःसंप्रेषयामासविशांपतिःप्रभो १४ वरस्यवांकेभरणायपूर्वंमुक्ताफलानांनिचयंगृहाण इतस्मकंन्यार्थं
मलंचदेहिमेघेषांहिवास्मात्कुलजाप्रसिद्धिः १५ नारदउवाच दृष्ट्वादिव्यंपरंनंदोविस्मितोपिविचारयन् पुत्रंयशोदांतन्नत्वं
नीत्वावोनःप्रपयौ १६ चिरंदध्यौतथानंदोयशोदाचयशस्विनी एतन्मुक्तासमानंतुद्रव्यंनास्तिगृहेमम १७ लोकलज्जागता
सर्वाहासःस्यादेहरेनव किंकर्तव्यंतस्तुनियच्छोकुलोद्वाहकर्मणि १८ ततोयोगपंतद्धरणंपश्चात्कार्यंधनागतं एवंचिंतयतः
नतस्यनंदस्यैवयशोदया १९ अलक्ष्यआगतस्तत्रभगवान्वृजिनार्दनः नीत्वादामशतंतेषुवह्निःतेत्रेषुसर्वशः २० मुक्ताफल
निचैकैकंशालिपन्सकरेणवै यथाबीजानिवाप्तानांस्वक्षेत्रेषुकृषीवलाः २१ अथनंदोयगणायनमालिकानिचयंततः प्रात
मूनवतेहृष्टासंदेहंसजगामह २२ नंदउवाच नास्तिपूर्वंयत्समानंतचापिन्यूनतांगतं अहोकलंकोभवितात्ज्ञातिषुस्वेषुसर्व
तः २३ अथेहक्रीडनार्थंहिकृस्मोयदिग्रहीनवान् बलदेवोथबालत्वात्पृच्छेद्दीनमानसः २४ नारदउवाच इत्थंविचार्यनं
दोपिकृस्नंएषुकृस्मादरं प्रहसन्भगवान्नंदंप्राहगोवर्द्धनोद्धरः २५ श्रीभगवानुवाच कृषीवलावयंगोपाःसर्वबीजप्ररोहकाः
तेत्रेषुक्षेत्रेसर्वबीजानिविकीर्णंकृतवानहं २६ नारदउवाच कृष्णाद्यस्तात्मजेनोक्तंतन्निर्भर्त्स्यव्रजेश्वरः तानिनेतुंततस्तदिनंतत्क्षेत्रे
सजगामह २७ तत्रमुक्ताफलानांतुप्राविंतःशतशःशुभाः दृष्ट्वातेदीर्घवपुषोहरित्पल्लवशोभिताः २८ मुक्तानांस्तवकानीतः
कोटिशःकोटिशोनृप संवाविलेविताजज्योतींषिपीवनमंडले २९ तदातिहर्षितोनंदोज्ञात्वाकृष्णंपरेश्वरं मुक्ताफलानिदिव्यानि
निपूर्वस्थूलसमानिच ३० तेषांतुकोटिशोभारान्नियाप्यशकटेषुच ददौतेभ्योहरिणेभ्योनंदराजोव्रजेश्वरः ३१ तेगृहीत्वाततस्सर्वेह

स्नमेवास्मिसमास्थितः पश्चिमोयार्भकैर्गौरसलेपदोभृशं मात्राचपित्रासहकारयामोवल्लाद्भवंतंकिलकंसदेयने ७ श्रीभगवानुवा
च कंसंहनिष्यामिमदोग्रदंडंसवांधवंमेशपथोयथाच एवंकरिष्यामियदोःपुरेवलान्नदानेसदाहंगिरिराजभूमेः ८ नारदउवाच
इत्थंश्रीदत्तिपात्राणिवालैर्नीलाप्रपथक्षयक भृष्टेषनयामाससानंदंनंदनंदनः ९ अहोप्यथपरंपृष्ठोनिर्भयोनंदनंदनः निरंकु
शोभाषणीयोवनेवीरःपुरेवलः १० अवामदेयशोदायैमंत्रार्थचकिलाशुवै एवंवदंत्यस्तागोप्यःसस्मितांप्रययुर्गृहान् ११ नीप
पालाशपत्राणांकृत्वाद्रोणानिमाधवः जघासवालकैःसार्द्धंपिच्छलानिदधीनिच १२ द्रोणाकाराणिपत्राणिवभूवुःशाखिनांनदा
तत्तेवंवमहाप्राणेद्रोणांनामनृपेश्वर १३ दधिदानंतत्रकृत्वापीत्वायत्रहृतंदधि नमस्कुर्यान्नरस्तत्रगोलोकान्नच्युतिर्भवेत् १४
नेत्रेश्राच्छायपत्रेवलीनोभून्माधवोऽर्भकैः तत्रतीर्थंलौकिकंवज्ञानंपापप्रणाशनं १५ कदंवखंडंतीर्थंचलीलायुक्तंहरेःसदा
तस्यदर्शनमात्रेणनरोनारायणोभवेत् १६ यत्रैवराधयारासेश्रृंगारोऽकारिमैथिल तत्रगोवर्द्धनेजातंस्थलंश्रृंगारमंडलं १७ ये
नरूपेणकृष्णेनधृतोगोवर्द्धनोगिरिः तद्रूपंविद्यतेतत्रनृपश्रृंगारमंडले १८ गिरिराजगुहामध्यात्सर्वेषांपश्यतांनृप स्वतःसिद्धंच
तद्रूपंहरेःप्रादुर्भविष्यति १९ श्रीनाथंदेवदमनंमंवदिष्यंतिसज्जनाः गिरिराजेगिरौराजन्सदालीलाकरोतियः २० येकरिष्यंतिने
त्राभ्यांतस्यरूपस्यदर्शनं तेकृतार्थाभविष्यंतिमैथिलेंद्रकलौजनाः २१ जगन्नाथोरंगनाथोद्वारिकानाथएवच वद्रिकानाथच
तुःकोणेभारतस्यापिवर्त्तते २२ मध्येगोवर्द्धनस्यापिनाथोयंपर्वतेनृप पवित्रेभारतेवर्षेपंचनाथाःप्रकीर्त्तिताः २३ सद्धर्ममंडप
स्तंभाश्चार्तत्राणपरायणाः तेषांतुदर्शनंकृत्वानरोनारायणोभवेत् २४ चतसृणांभुविनाथानांकृत्वायात्रांनरःसुधीः नपश्येद्देवदम
नंसनयात्राफलंलभेत् २५ श्रीनाथंदेवदमनंपश्येद्गोवर्द्धनेगिरौ चतसृणांभुविनाथानांयात्रायाःफलमाप्नुयात् २६ ऐरावतस्यसु
रभेःपादचिह्नानियत्रवै तत्रस्नात्वानरःपापीवैकुंठंयातिमैथिल २७ हस्तचिह्नंपादचिह्नंश्रीकृष्णस्यमहात्मनः दृष्ट्वानत्वानरःक
श्चित्साक्षात्कृष्णपदंव्रजेत् २८ दानानितत्पनीयानिकुंडायायतनानिच श्रृंगाणिगिरिराजस्यकिंभूयःश्रोतुमिच्छसि २९ ॐ इति।

35

गर्ग॰ श्रीमद्गर्गाचार्यसंहितायां गिरिराजखंडे गिरिराजवर्णनंनाम सप्तमोध्यायः ७ ॥ बहुलाश्व उवाच केषुकेषु तदंगेषु किंकिं पूर्वं
गि॰ समाश्रितं वद देव महाभाग त्वं परावरवित्तमः १ नारद उवाच यत्र सिद्धिश्च सिद्धिः स्यात्तदंगं परमं विदुः क्रमतो नास्त्यंगचयो गि
९ रिराजस्य मैथिल २ यथा सर्वगतं ब्रह्म सर्वांगानि च तस्य वै विभूतेर्भावतश्चात्र तथा वक्ष्यामि मैथिल ३ शृंगारमंडलस्याधो श्रीमु
खं गोवर्द्धनस्य च यत्रान्नकूटे भगवान्कृतवान्व्रजवासिभिः ४ नेत्रे वै मानसीगंगा नासा चंद्रसरोवरः गोपालकुंडकर्णौ च कर्णां
तं कुसुमाकरः ५ मौलिचिह्नशिला तस्य ललाटं विद्धि मैथिल शिरश्चित्रशिला तस्य ग्रीवा वै वादिनी शिला ६ कौडकं पार्श्वयुग्मं स्या
दौष्णीषं कटिरुच्यते द्रोणतीर्थं पृष्ठदेशे लौकिकं चोदरे स्मृतं ७ कदंबखंडमुरसि जीवः शृंगारमंडलं श्रीकृष्णपादचिह्नेन मन
स्तस्य महात्मनः ८ हस्तचिह्नं तथा बुद्धिरैरावतपदे पदे सुरभेः पादचिह्नेषु चित्तं तस्य महात्मनः पुच्छकुंडे तथा पुच्छं वत्सकुंडे
बलं स्मृतं रुद्रकुंडे तथा क्रोधं कामं शक्रसरोवरे कुबेरतीर्थं चोद्योगं ब्रह्मतीर्थं प्रसन्नता यमतीर्थे त्वहंकारं वदंतीत्थं पुराविदः ११
एवमंगानि तीर्थानि गिरिराजस्य मैथिल कथितानि मया तस्य सर्वपापहराणि च १२ गिरिराजे विभूतिं च यः शृणोति नरोत्तमः स
गच्छेद्धाम परमं गोलोकं योगिदुर्लभे १३ समुत्थितोसौ हरिवक्षसो गिरिर्गोवर्द्धनो नाम गिरींद्रराजराट् समागतो ह्यत्र पुलस्त्यते
जसा यद्दर्शनाज्जन्म पुनर्न विद्यते १४ ॥ इतिश्रीमद्गर्गाचार्यसंहितायां गिरिराजखंडे विभूतिवर्णनंनामाष्टमोध्यायः ८ ॥ बहु
लाश्व उवाच अहो गोवर्द्धनः साक्षाद्गिरिराजो हरिप्रियः तत्समानं न तीर्थं हि विद्यते भूतले दिवि १ कदा बभूव श्रीकृष्णवक्षसोयं
गिरीश्वरः एतद्वद महाबुद्धे त्वं साक्षाद्धरिमानसः २ श्रीनारद उवाच गोलोकोत्पत्तिवृत्तांतं शृणु राजन्महामते चतुःपदार्थदं नृणा
माद्यलीलासमन्वितं ३ अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान्स्वयं ४ प्रत्यग्धामा स्वयं।
ज्योतिरसमानो निरंतरः यत्र कालः कलयतामीश्वरो धाममानिनां ५ राजन्न प्रभवेन्माया न महांश्च गुणान्विता न विशंति कवि।
द्राजन्मनश्चित्तो मतिर्ह्यहं ६ स्वधाम्नि ब्रह्मसाकारमिच्छया विरचीकरत् प्रथमे चात्र विक्षोभो विशेषेतो हरद्वपुः ७ ततस्तं गोमहा ९

गर्गा. त्राः तेस्नादितीर्थषितोहंगिरेरस्मिन्महाद्विज १५ श्रीकृष्णकृपयासाक्षात्कल्याणमेवभूवह नारदउवाच एवंप्रवर्तनस्तस्य।
गि. गोलोकाच्चमहारथः १६ सहस्रादित्यसंकाशोहयायुतसमन्वितः पश्यतस्तस्यविप्रस्यतमानेनुविदेहराट् १७ तमागतेर
४ थंदिव्यंनेमतुर्विप्रनिर्जरौ १८ ततःसमारुह्यरथंससिद्धोविरंजयन्मैथिलमंडलंदिशां श्रीकृष्णलोकंप्रययौपरात्परंनिकुं
जलीलाललितंमनोहरं १९ विशोधितस्मात्तुनरागतोगिरिंगोवर्द्धनंसर्वगिरींद्रदेवतं प्रदक्षिणीकृत्यपुनःप्रणम्यतंययौ
गृहंमैथिलतत्प्रभाववित् २० इदंमयातेकथितंप्रचंडंस्वमुक्तिदंश्रीगिरिराजखंडने शृण्वाजनःपापपरोपिचंडंस्वप्नेनप
श्येद्यमसुप्रदंडं २१ यःशृणोतिगिरिराजयशस्वंगोपराजनवकेलिरहस्यं देवराजइवसोत्रसमेतिनंदराजइवशांतिसमेतः
२२ ॥ इतिश्रीमद्गर्गाचार्यसंहितायांगिरिराजखंडेश्रीनारदबहुलाश्वसंवादेगिरिराजप्रभावप्रस्ताववर्णनोनाम [illegible]दिमो।
तोनामैकादशोध्यायः ११ ॥ समाप्तोयंगिरिराजखंडः ॥ ॥४॥ पठितंश्रुतंरामकाश्मीरीकेप्रयिकारसेछापेखाने·
मित्रविलाससलाहोरमेंछपा ॥ श्रीराधाकृष्ण ॥ राधाकृष्ण ॥ राधाकृष्ण ॥ राधाकृष्ण ॥ राधाकृष्ण ॥ रामकृष्ण

चतुर्थः खंडोयम् ४

37

५